रामस्तु संजातकुतूहलेन ॥ विसिष्मिये धर्मभृतां वरिष्ठः स चेतसा यादववंशचन्द्र ॥ ९ ॥ इति श्रीविष्णुधर्मोत्तरे प्रथमखंडे मार्कण्डेयवज्रसंवादे अस्त्रप्रदानं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥ ॥मार्कण्डेय उवाच॥ कैलासशिखरे रम्ये नानाधातुविचित्रिते ॥ नानाद्रुमलताकीर्णे नानापक्षिनिनादिते ॥ १ ॥ गंगानिर्झरसंजाते[1] सततं चारुनिस्वने ॥ देवदेवं महादेवं पर्यपृच्छत भार्गवः ॥ २ ॥ राम उवाच ॥ देवदेव महादेव गंगालुलितमूर्द्धज ॥ शशांकलेखासंयुक्तजटाभारातिभास्वर[2] ॥ ३ ॥ पार्वतीदत्तदेहार्ध कामकालाङ्गनाशन ॥ भगनेत्रान्तकाचिन्त्य पूष्णो दशनशातन ॥ ॥ ४ ॥ त्वत्तः परतरं देवं नाऽन्यं पश्यामि कञ्चन ॥ पूजयन्ति सदा लिंगं तव देवाः सवासवाः ॥ ५ ॥ स्तुवन्ति त्वामृषिगणा ध्यायन्ति च मुहुर्मुहुः ॥ पूजयन्ति तथा भक्त्या वरदं परमेश्वर ॥ ६ ॥ जगतोऽस्य समुत्पत्तिस्थितिसंहारपालने ॥ त्वामेकं कारणं मन्ये त्वयि सर्वं प्रतिष्ठितम् ॥ ७ ॥ कं त्वं ध्यायसि देवेश तत्र मे संशयो महान् ॥ आचक्ष्व तन्मे भगवन्यद्यनुग्राह्यता मयि ॥ ८ ॥ प्रसादमांमुख्यतया मयैतद्विस्रम्भमासाद्य जगत्प्रधान ॥ भवन्तमीड्यं प्रणिपत्य मूर्ध्ना पृच्छामि संजातकुतूहलात्मा ॥ ९ ॥ इति श्रीविष्णुधर्मोत्तरे प्रथमखण्डे मार्कण्डेयवज्रसंवादे परशुरामोपाख्याने शंकरगीतासु रामप्रश्नो नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ छ ॥ शंकर उवाच ॥ त्वदुक्तोयमनुप्रश्नो राम राजीवलोचन ॥ त्वमेकः श्रोतुमर्होऽसि मत्तो भृगुकुलोद्वह ॥ १ ॥ यत्तत्परमकं धाम मम भार्गवनन्दन ॥ यत्तदक्षरमव्यक्तं परं यस्मान्न विद्यते ॥ ज्ञानज्ञेयं ज्ञानगम्यं हृदि सर्वस्य चाश्रितम्[3] ॥ २ ॥ त्वामहं पुण्डरीकाक्षं चिन्तयामि जनार्दनम् ॥ एतद्राम रहस्यं ते यथावत्कथितं वचः ॥ ३ ॥ ये भक्तास्तमजं देवं न ते[4] यान्ति पराभवम् ॥ नमामि शमजमव्यक्तं सर्वभूतपरायणम् ॥ ४ ॥ नारायणमनिर्देश्यं जगत्कारणकारणम् ॥ सर्वतः पाणिपादन्तं सर्वतोऽक्षिशिरोमुखम् ॥ ५ ॥ सर्वतः श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठति ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ॥ ६ ॥ असक्तं सर्वतश्चैव निर्गुणं गुणभोक्तृ च ॥ बहिरन्तश्च भूतानामचरश्चर एव च ॥ ७ ॥ सूक्ष्मत्वात्तद्विज्ञेयं दूरस्थं चान्तिकं च यत् ॥ अविभक्तं विभक्तेषु विभक्तमिव च स्थितम् ॥८॥ भूतवर्ति च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ ज्योतिषामपि तज्ज्योतिः तमसां परमुच्यते ॥९॥ अनादिमत्परं ब्रह्म न सत्तन्नाऽसदुच्यते ॥ प्रकृतिर्विकृतिर्योऽसौ जगतां भूतभावनः ॥१०॥यस्मात्परतरं नास्ति

1 'गंगाशर्करसंजाते' इति ख० । 2 'शशांकलेखासंयुक्त जयभारानुरान्तक' इति ख० । 3 'श्रितम्' इति ख० । 4 'से' इति ख० ।

तं देवं चिन्तयाम्यहम् ॥ इच्छामात्रमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ ११ ॥ यस्य देवादिदेवस्य तं देवं चिन्तयाम्यहम् ॥
यस्मिन्सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ॥ १२ ॥ यश्च सर्वमयो नित्यस्तं देवं चिन्तयाम्यहम् ॥ योगीश्वरं पद्मनाभं विष्णुं
जिष्णुं जगत्पतिम् ॥ १३ ॥ जगन्नाथं विशालाक्षं चिन्तयामि जगद्गुरुम् ॥ शुचिं शुचिपदं हंसं तत्परं परमेष्ठिनम् ॥ १४ ॥ युक्त्वा
सर्वात्मनाऽऽत्मानं तं प्रपद्ये प्रजापतिम् ॥ यस्मिन्विश्वानि भूतानि तिष्ठन्ति च विशन्ति च ॥ १५ ॥ गुणभूतानि भूतेशे सूत्रे मणिगणा इव ॥
यस्मिन्नित्ये तते तन्तौ दृष्टे स्रगिव तिष्ठति ॥ १६ ॥ सदसद्ग्रथितं विश्वं विश्वांगे विश्वकर्मणि ॥ हरिं सहस्रशिरसं सहस्रचरणेक्षणम् ॥ १७ ॥
प्राहुर्नारायणं देवं यं विश्वस्य परायणम् ॥ अणीयसामणीयांसं स्थविष्ठञ्च स्थवीयसाम् ॥ १८ ॥ गरीयसां गरिष्ठञ्च श्रेष्ठञ्च श्रेयसामपि ॥ यं
वाकेष्वनुवाकेषु निषत्सूपनिषत्स्वपि ॥ १९ ॥ गृणन्ति सत्यकर्माणं सत्यं सत्येषु सामसु ॥ चतुर्भिश्चतुरात्मानं सत्त्वस्थं सात्त्वतां पतिम् ॥२०॥
यं दिव्यैर्देवमर्चन्ति गुह्यैः परमनामभिः ॥ यमनन्यो व्यपेताशीरात्मानं वीतकल्मषम् ॥ २१ ॥ दृष्ट्वानन्त्याय गोविन्दं पश्यत्यात्मन्यवस्थितम् ॥
पुराणः पुरुषः प्रोक्तो ब्रह्मा प्रोक्तो युगादिषु ॥ २२ ॥ क्षये संकर्षणः प्रोक्तस्तमुपास्यमुपास्महे ॥ यमेकं बहुधात्मानं प्रादुर्भूतमधोक्षजम् ॥ २३ ॥
नान्यभक्ताः क्रियावन्तो यजन्ते सर्वकामदम् ॥ यमाहुर्जगतां कोशं यस्मिन्सन्निहिताः प्रजाः ॥२४॥ यस्मिंल्लोकाः स्फुरन्तीमे जाले शकुनयो
यथा ॥ ऋतमेकाक्षरं ब्रह्म यत्तत्सदसतः परम् ॥ २५ ॥ अनादिमध्यपर्यन्तं न देवा नर्षयो विदुः ॥ यं सुरासुरगन्धर्वास्ससिद्धर्षिमहोरगाः ॥२६॥
प्रयता नित्यमर्चन्ति परमं दुःखभेषजम् ॥ अनादिनिधनं देवमात्मयोनिं सनातनम् ॥ २७ ॥ अप्रतर्क्यमविज्ञेयं हरिं नारायणं प्रभुम् ॥
अतिवाय्विन्द्रकर्माणं चाऽतिसूर्याग्नितेजसम् ॥ २८ ॥ अतिबुद्धीन्द्रियग्रामं तं प्रपद्ये प्रजापतिम् ॥ यं वै विश्वस्य कर्त्तारं जगतस्तस्थुषां
पतिम् ॥ २९ ॥ वदन्ति जगतोऽध्यक्षमक्षरं परमं पदम् ॥ यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः ॥ ३० ॥ चन्द्रादित्यौ च नयने तं
देवं चिन्तयाम्यहम् ॥ यस्य त्रिलोकी जठरे यस्य काष्ठाश्च वाहनाः ॥३१॥ यस्य श्वासश्च पवनस्तं देवं चिन्तयाम्यहम् ॥ विषये वर्त्तमानानां
यं तं वैशेषिकैर्गुणैः ॥ ३२ ॥ प्राहुर्विषयगोप्तारं तं देवं चिन्तयाम्यहम् ॥ परः कालात्परो यज्ञात्परस्सदसतश्च यः ॥ ३३ ॥ अनादिरादिर्विश्वस्य
तं देवं चिन्तयाम्यहम् ॥ पद्भ्यां यस्य क्षितिर्जाता श्रोत्राभ्याञ्च तथा दिशः ॥३४॥ पूर्वभागे दिवं यस्य तं देवं चिन्तयाम्यहम् ॥ नाभ्यां यस्या

१ 'ईहामात्रम्' इति ख० । २ 'यसतोऽन्यो' इति क० । ३ 'यमाहुर्जगतः कोशं' इति ख० ।